N. A.
Shankara samhitā
श्रीशंकर संहिता
Sanskrit
Paper - Handwritten
N. A. (very old)
20 Folio
14.8" x 5.8"
Incomplete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰क॰र

६॰ ११४— नं २२५१

राम॰

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मार्गमखिलंसंस्थाप्यलिंगार्चकान्सत्कृत्वासकलान्जनानिहघनशंभुंसमेष्यंतिते ५ यःशैवशास्त्रकथनंप्रकटीकरोतिलिं
गांगसंगविषयंपरमार्थभूतं ऽनोकेतुदुर्जनघनेसहिलिंगधारिमाहेश्वरश्रुतिपुराणविदागमाज्ञा ६ पौराणानिशिवकथा
श्रुतिमितांसर्वागमर्थान्वितांतायोरसानितेनरास्मिन्मिदंत्रैलोक्यमीशोहिसः सर्वस्यप्रियकृत्सदाभवतिसःश्रीमानस
दानंदचेतसंज्ञासंतएवसर्वसुखदाश्रीनंदिमुख्यप्रियः ७ इमंशैवंमहाधर्मंयःस्थापयतिशुद्धधीः सादरंवीरशैवेषुसो
पिमुक्तिमवाप्नुयात् ८ शक्तोयःस्थापितुंधर्ममुपेक्षांकुरुतेनरः सोसिपत्रवनंनामनरकंप्रतिपद्यते ९ तस्माच्छिक्त
यावत्नरक्षेत्सर्वप्रयत्नतः तद्रक्षणान्महाविघ्नंतिमर्त्याधर्मपरायणाः १० येयंश्रद्धान्विताविप्रारक्षध्वंसर्वभावतः॥
शिवागमरहस्यज्ञानंशिवलिंगार्चनेरतान् ११ यइमंपटलेध्यायंनरोभक्तिसमन्वितः ससम्यग्ज्ञानवान्भूत्वाशिव
सायुज्यमाप्नुयात् १२ शृणोतिपूजावेलायांश्रावयद्वासमाहितः प्रसीदतिशिवस्तस्यनीलकंठोंविकापतिः १३ नव
क्तव्यमिदंशास्त्रंभक्तिहीनायपापिने नास्तिकायमनुष्यायश्रद्धाहीनायसर्वदा १४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इतिवादिनिगौरीशोवृषादुत्तीर्यतत्क्षणात् आलिंग्यदेवीतानेनानेकधामूर्ध्निजिघ्रति १५ गाढंस्तनांतरेह
त्वाचकारैकंषडास्यमून् द्विपादंद्वादशभुजंषड्वक्त्रंत्रिषडीक्षणं १६ ददौस्तन्यंसुनययास्वर्णपात्रेण
शोभनं बालोपिलीलयाकस्य:पयोषड्भि:पयोमुखै: १७ विद्यामयंज्ञानमयंयावनंमातुरात्मन:
आलोकयन्मुखंतस्याअपांगैरंबुजप्रभै: १८ पिबत्यस्मिन्पयोमातु:प्रस्कन्नाबिंदवस्तत:प
तितान्सलिलेपीत्वाशंकरात्तेमुने:सुता: १९ शापात्पराशरस्यासन्मत्स्यभावमुपागता: पीत
मात्रेणतेषांतत्पूर्वरूपत्वमागतं २० अथदेवीकुमारेणशिवांकेवृषभोपरि प्रापदुंदुभिनि
र्घोषैर्जयशब्दादिमंगलै: २१ पुष्पवृष्टिरभूत्तत्रपित्रोर्मूर्ध्निदिवश्च्युता ननृतुर्मुनय:सिद्धारंडह।
स्ताजटाधरा: २२ आरोप्यवृषमीशोपिसुकुमारंहिमाद्रिजां आलोक्यकृत्तिका:प्राहात्प्रीतोवरमु
मापति: २३ युष्माभिर्वर्धितोबाल:स्तन्येनयदसौचिरं युष्माकंसंज्ञयालोकेकार्तिकेयोभवत्वयं २४ अथप्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं·सं· र्भतिलोकेस्मिन्दिने युष्मासु मानवाः प्रीतयेस्य चरिष्यंति व्रतं चिरकृतादराः २५ तेषामिष्टानि पुत्रो सं·कां·
येसघोरास्त्यसंशयं पुत्रार्थी लभते पुत्रान्स्त्रियंस्त्रीकाम आप्नुयात् २६ धनार्थीष्टधनं भूरिप
शुकामः पशून्बहून् विद्यार्थी लभते विद्यां निष्कामो मोक्षमाप्नुयात् २७ कुमारसंभवाध्यायं य
शृणोति कृतादरः वंध्यापि लभते पुत्रं कुमारसदृशं ध्रुवं २८ सूत उवाच वरमिति कृतरुणाब्धिः कृत्तिका
भ्यो वतीर्य स्वयमपि सहदेव्याः पुत्रमादाय प्रमोदभूम्यां पुनरपि भवनं स्वं प्राप भूतेंद्रसंघैर्देहरिविधिसुरयोगी
न्द्रसंभावितांघ्रिः २९ इति श्रीशंकरसंहितायां संभवकांडे अष्टाविंशोध्यायः २८ सूत उवाच अथ किं
चिद्देवशिवयोः सविधे गमयन्स कालमुपलालनयोः शिशुता विनोदपरिशीलइति हरसूनुरंगमभि रम·
मंडिमुदा १ पदयोः सहेमकटयुगेन पुरः मणिपुरद्दलयप्रलंबकैः कटिसूत्रकिंकिणि मणिकणितैरुरसा
च हारमगजातनुजाः २ बहुनिष्ककांचनमणिप्रकारैरधिकं ठमद्भुतविभूषणकैः रुरुचे भुजांतरम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निकीर्णेषु मार्गस्योभयपार्श्वयोः संक्रांतप्रतिमा गौरी दशधा विराजसा ७ तां दृष्ट्वा प्रतिमां शंभुरत्ने
भ्यः सहसाकृषत् समाकृष्यति देवेशे सर्वारत्नपरिष्कृताः ८ तत्तद्रत्नाभदीप्तांग्यस्तत्तद्दलसमाकृ
याः उपतस्थुर्महादेवं देवींच हिमशैलजां ९ प्रेक्ष्यंत्यश्च महादेवं प्रेमनिर्भरमानसाः मुखं कम
लपत्राक्षं सुनासं चारुकुंडलं १० अकलंकशरच्चंद्रकांतं मंदस्मितोज्वलं पिबंतीनामभक्तैर्भोजठ
रेषु शिवाननं ११ तासां मरीचिभिर्भीनोः कालिकानां क्षणाद्दहो आलोक्य देवी तासां तद्भावमा
रक्तलोचना १२ गर्भं च जठरे भूयो मन्युः प्रस्फुरिताधरा मा स्वपध्वंसगर्भाश्च चिरं भवत कन्यकाः
१३ इति देव्याः प्रशापानां रत्नानां योषितां मुहुः स्वेदोद्गमो महानंगे मुक्तामणिरिवाबभौ आसामा
सन्नगणश्रेष्ठानि युतं खड्गपाणयः शूराः स्वेदोद्गमादस्माच्च महस्त्राम होजसः भगाक्षिहंता भगवान्
तान्कौमारानकल्पयत् गौर्याः शापात्तु ये गर्भे निवसंति सहौजसः १६ ते शिवं जगतामीशमूचुश्चिंते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निधायवै शुश्रूषणारां स्तांश्चापि पार्वतीमीश शासनात् १७ महाभारेणगर्भस्य दुःखितास्तास्तु नित्यशः

ततः कालेन महता परिचर्यापरासु च १८ तासु सर्वासु पत्नेन शंकरे च प्रसेदुषि परिचर्याप्रसन्नायां
पार्वत्यां परमेश्वरः १९ तासामनुग्रहार्थं तु तामप्रार्थयदीश्वरः स्वयं प्रसन्नाशर्वाणि प्राप्ते शा
स्त्राश्वताः सखीः २० अनुजग्राह गर्भाणामवतारोस्तु भूतये जगतामिति तासेवं नवजा
तामहौजसः २१ वीरवीरवरालोके मान्हणं वर्णयेशलाः रत्नवल्लीतु यारक्तारत्नजा वनितो
नमा २२ तस्यामाविरभूद्वीरो वीरबाहुः प्रतापवान् अन्यातरलवल्लीति मुक्तामणि समुद्भ
वा २३ सर्ववीरवरः श्रीमांस्तत्पुत्रो वीरकेसरी पुष्परागसमुद्भूता पोषीवल्लीतियास्मृता

२४ तस्यां वीरमहेंद्रोभूत्सर्ववीरवराग्रणीः वज्ररत्नसमुद्भूता वज्रवल्लीतियास्मृता तस्यां
जातोगणश्रेष्ठो वीरमाहेंद्रनामकः माणिक्यमणिसंभूता मणिवल्लीतियास्मृता वीरराक्षसनामाभू

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तच्छ्रुत्वात्वरमाणोवदद्वचः नाहमस्मिविधेशक्तः सोममंतपुरेशिवं नापिचान्येपुराणाऐवचः श्रु
म्र त्वातांधसां रत्यादेवंसमासाघमस्मासीद्दिदितंचवः २६ प्रभंजनवचःश्रुत्वापुनरुतंस्वयंभुवा
ब्रह्माउवाच उपदेशपरंशंभुंवटमूलनिवासिनं २७ युयोजनिजयायत्यातदेनस्तद्दिनाशक्त
त् अष्टमूर्तैर्भवान्मूर्तिरिष्टाशिष्टसुपूजितः २८ सुरकार्येमहत्यस्मिन्त्वामेववयमाश्रिताः
प्रत्याख्यानंनकर्त्तव्यंविलंवमपिमाकुरु २९ गच्छत्वंतुशिवानित्यंयंथानःपवमानभोः अप्रार्थ
यन्सुराश्चैवंविप्राब्रह्मविदोमलाः ३० सप्रार्थितोमतिंचक्रेकथंचित्कथमाभुगः आमंत्र्याभिव
तस्येतानचलंराजतंमरुत् ३१ औत्तरोपिततः पूर्वोदक्षिणःपश्चिमः क्षणात् दक्षिणोपिचमं
दमन्पुरमीशितुराश्रितः ३२ गोपुरेणपुरंप्राप्यस्वामिनोवासमासदत् दिव्यमाणिक्यखचितंदृष्टि
प्रसरतस्करं ३३ अनेकादित्यसंकाशमभ्रंलिहगृहाभुतं रस. दिव्यनारीकदंबोचितं दृशिभरं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं·सं· अतीतकक्षो गणपैर्द्वास्स्थैर्भीमैरलक्षितः ३४ अंतःपुराधिपस्यापि नंदिनो निलयं गतः वायुस्वरूपवांस्त सं·कां·
त्र तेनाबोधि समीरणः ३५ उक्तश्च सरुष्टया हि साहसितं प्रभंजन विशसि त्वं प्रभोस्तावत् किमर्थं स
र्वनंदर ३६ निशांतचंद्रचूडस्य महसं नो सत्र चोरवत् नंदीश्वरवचनं श्रुत्वा निवृत्तगतिरयतः ३७ सदाग
तिः प्रणम्याथ शैलादेः प्रांजलिः पुरः अज्ञोस्मि देवकार्यार्थमादिष्टोस्मि सुरैर्मुहुः ३८ अपराधो महा
नस्ति क्षम्यतां क्षम्यतां त्वया विज्ञाप्य प्रभवे पूर्वं प्रवेक्ष्याम्यथ मां प्रभो ३९ नंदी प्रोवाच तं क्रुद्धो निवर्त्त स्व
समीरण समयो नैव तस्यैष मा विनं क्षोभ मनोजव ४० खिन्नोथ वायुर्देवोक्त्या किं करोमीति चिंतयन्
इदं विबुधमुख्येषु निवेदिष्ये कथं च न ४१ तैरेवात्रोचितं यत्तत्करिष्यन्ति सुदेवपैः इति निश्चित्य समन राम·
सा मनोवेगसमास्थितः ४२ रत्नसानुं जगामाशु गुहामपि सुराश्रितां इति श्रीशंकरसंहितायां सं
भवकांडे चतुर्विंशोध्यायः २४ सूत उवाच तं विलोक्य सुराः सर्वे प्रहर्षमतुलं गताः तमपृच्छन्नुपस्थितं पा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्थैं प्रणम्यानतचेतसः सहितायो महाभागमहादेवः सतां गतिः करोतिकिं भणेशानी पार्वत्या परमेश्वरः
२ तेषामिति वचः श्रुत्वा प्रसन्नमनसां तदा वायुराह चनान् प्रेक्ष्य सर्वानेवेदमंजसा ३ वायुः मया
नविदितस्तत्र ह्रजांतः शिवयोः सुराः क्रुद्धेन नंदिना दृष्टो नायं वो वसरः सुराः ४ इति श्रुत्वा निवृत्तो
स्मि प्रभुणामेवमेवहि अतः परममी यूयं समाचरत यद्धितं ५ इति वायो वचस्त्येते खिन्नाः सब्रह्मकाः
सुराः सनारायणकाः सर्वे मंत्रयित्वा चिरं पुनः ६ निर्गत्य मेरुकुंजांते प्रायुः कैलासमंजसा आसे
दुस्तत्र ते शंभोः पुण्यमायतनं महत् ७ तत्र देवाधिदेवस्य द्वारदेशं समाश्रिताः सुचिरं ते स्थितास्ते
कालमासामासुरतंद्रिताः ८ ततः सर्वे सुराधीशा नंदिनं गणपुंगवं सेवितं गणपैः सर्वैः सिद्धगंधर्वा
किन्नरैः ९ अनिरुध्यावहिर्द्वारमाश्रितं समयेन रा आलोकमुदमापुस्ते धनं लब्ध्वेव निर्धनाः १० स
तानकृप्रस्तनैस्तं सममभ्यर्च्याम्रताधसः संतोष्य विविधैः स्तोत्रैरग्रे प्रांजलयो ब्रुवन् ११ त्वपाधमतरालो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं·सं· केशात्वंकायवत्संभवः शिलादभगवान्साक्षाल्लोकगुरुरीरितः १२ सुसहायोभवानघसुरगणा सं·कां·
ममितद्युते विज्ञाप्यदेवदेवायसंप्राप्तांनःसुदुःखितान् १३ समुद्रजगन्मग्ने शोकाख्येचमहा
र्णवे श्रुत्वेतिवैबुधंवाक्यंश्रीमान्नंदीशिवप्रियः १४ प्रविश्यदेवनिकटंज्योतिःपुंजोचितंमुदा
उपतस्थौतदादेवौजगतांपितरौगतौ १५ ज्ञात्वेंगितेनतच्चित्तंचित्तजन्मरिपोःपुनः सजित्पत्
सुरान्प्राप्तान्सेवार्थेविनयान्वितः १६ प्राप्तानुज्ञः सुरान्पश्चात्प्रापयद्देवनेशितुः तदादेवोपिदेवा
नांसाकंदेव्याजगत्प्रभुः १७ दिव्यसिंहासनारूढोदर्शनंप्रददौस्मयन् तेदेवास्तमथालोक्यप्रीति
कंटकिततत्वचः १८ अस्तुवन्स्तुतिभिस्तुत्यमवशेनांतरात्मना देवाः ॐ नमःप्रणतार्तिघ्नशिवा एम·
पाशुभमोचक १९ कल्याणरूपभवतेकामदायिन्नमोस्तुते कामघ्नायपुरघ्नायकलिप्रमथनायते२०
सोमसूर्याग्निनेत्रायनमः सोमार्धधारिणे अघघ्नायमखघ्नायसुखप्राप्त्यैकहेतवे २१ शंभवेशंकरायास्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वेस्त्वायत्रिशूलिने यमप्राप्य विषप्राप्य शत्रुप्राप्य सतां सदा २२ अस्माकं प्रभवे तुभ्यं लोकानां प्रभवे नमः
पातिरातिं प्र सर्वेषां देवानामसुरोऽद्रवा २३ सेनान्समागुसंप्राघनोघानोघदयालुना सूत उवाच प्रार्थितः
प्रभुस्त्वं थैरिविषभिर्दयानिधिः २४ बभूव वदनैः षड्भिरलंकृततनुस्तदा आसीनामासने सार्धमंबिका
मंबिकापतिः २५ व्यलोकयत्परमेयात्मा साकांक्षं षड्भिराननैः तत्क्षणं नयनैः षड्भिः ललाटैरूर्ध्वरेतसः २६
निरगात्कोटिसूर्याभं कोटिकालाग्निसन्निभं घोरं तेन जगत्सर्वं व्याप्तं सचराचरं २७ अमरास्तेजसा
तेन दुद्रुवुः सर्वतोदिशं तत्र तत्र समुद्वीक्ष्यन्त तेजः शंभवं सुराः २८ अतिभीता इवाभीता इति सर्वे विलिल्यि
रे अप्राप्तशरणा दिक्षु प्राप्तास्ते सत्वरं पुनः २९ अनन्यशरणा भूपः शरणं प्रापुरीश्वरं भीतिकंपितसर्वांगा
निश्वसंतो मुहुर्मुहुः ३० शरणाय शरणं देव शरणं नो भवाव्यय सर्वेश सर्वलोकेश सर्वशक्तिसमन्वित ३१
सर्वार्थसाधनोपाय सर्वजीवदयापर रक्षस्मांस्तेजसानेन सन्निरुद्धे क्षणात्क्षणात् ३२ सूत उवाच इतित

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं॰सं॰ त्प्रार्थनात्तुष्टः साम्बः सर्वेश्वरेश्वरः दयानिधिस्तोमभूपः तेजः सस्माराचेतसा ३३ ततेजस्स्मृतिमात्रेण सं॰ कां॰
पित्रोः प्रापान्तिकेस्मरणात् सत्स्मीभूतः पुनः षोढास्थितं शांतंतत्तेजसा ३४ ततोदेवः कृपामूर्तिर
मराणवत्तोमतत् वन्हिवायूसमाहूयवचनंचेदमब्रवीत् ३५ युवामिदंमहद्देवायोषोढास्थितंपुनः
आमरीमापगामाशुसंप्रापयतमाचिरं ३६ अंते शरवणस्यैव आज्ञयाममलेखकैः इतिश्रीशंकरसं
हितायांसंभवकांडेपंचविंशोध्यायः २५ द्विजाः सूतैतदद्भुतंलोके शंभोरमिततेजसः ऊर्ध्वरेतस्त्वमा।
श्वर्यनेत्राग्निज्वालाटिकाकृतं १ तदेतदैश्वरंतेजः स्कंदनामापतत्कथं कथयस्वमहाभागकथांनोविस्म
यावहां २ सर्वज्ञोसिभगानेवजगत्यस्मिंश्चराचरे त्वयानविदितंकिंचित्लोमहर्षणविद्यते ३ कथयास्म राम॰
न्ममखिलंसुब्रह्मण्यसमुद्भवं इतिसंप्रार्थितोविप्रैर्व्यासशिष्योमहातपाः ४ संप्रेक्ष्यकथयामाससर्वमेवं
यथातथं सूतउवाच शृणुध्वंतुमुनयः सर्वेसुब्रह्मण्यसमुद्भवं ५ व्यासेनकथितंपूर्वमस्मभ्यंकरुणाबलात्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदिदं संप्रवक्ष्यामि श्रेयःसाधनमुत्तमं ६ ईशेन तौ समादिष्टौ वन्हिवायू महाबलौ तेजस्तोद्दहनेनस्स शर
रण्यां तमोजसा ७ देवं प्रणम्य तौ भक्त्या ब्रूतां प्रीतौ कृतांजली आवां क्व क्व भवत्तेजः सर्वलोकाभिभं वि
भो ८ शक्तिश्च कीदृशी वो द्रुमावयोर्विकापने श्रुत्वा तयोर्वचः भूलोस्मयमानमुखांबुजः ९ प्रोवा
चैवचनं वन्हेर्वायोर्मच्छासनादृलं अस्तु तेजः समुद्धारे भवदैतच्चलाघवं १० देवाश्च वेधसा सार्धमनुयो
तुमुपारिरणा इति ब्रुवन् संत्वरया देशः परमयां वया ११ पावकः पारमेशं तच्छीतलं तेजसा ज्वलन् समूलष
ड्विधं मृध्रोक्षिय दूरं श्रमं गतः १२ पवमानोपि चाम्नोमं श्रमं प्राप्य पुनः पुनः कथं कथंचिद्गंगायाअनेशरव
णास्य च १३ फलेन महतानाभ्यां निक्षिप्तं तत्र तच्छिवं पद्मरत्नं डेपत्रनिभं यद्यत्कान्तारसोरमे १४ तेनपीतजला
गंगा तेजसा ततुतां गता मध्ये शरस्तटाकस्य पद्ममध्यं निनायसा १५ सहस्रसूर्यप्रतिमं तत्र तच्छांभवं महः
षड्वक्त्रं द्वादशभुजं द्विपादं सुमनोहरं १६ वपुःपु पोषजगतां मं गल्याभ्युष्यवर्धनं कुमारः सुकुमाराणां निदर्शी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं.सं. नभभूत्स्वरणात् १७ पुष्पवृष्टिरभूत्तत्र दिव्यदुंदुभिनिःस्वनैः ननृतुश्चाप्सरःसंघाः सर्वेलास्यकलाकुलाः सं.कां.
१८ दिशः प्रसेदुर्मरुतोवपुश्च सुखमात्मनां वृंदारकागणेंद्राणां भुवनेष्वतिशोभनं १९ रोदसं ज्योतिःसु
राः सर्वे प्रथमं सुमनोहरं कुमाररूपमुद्वीक्ष्य कृतकृत्यावबंदिरे २० मेतिरेस्वंस्वमैश्वर्यं यथापूर्वं वयं
पुनः भोक्ष्यामहे सुरेंद्रेभ्यः पुनरानीय वैभवात् २१ सेवयास्येतितत्सेवां सादरं चक्रुरंजसा २२ क्षुरस्यप
रितोदिशो वह्निमुखाः सुराः २२ एवंपरिचरत्स्वेषु विष्णुर्दैत्यनिषूदनः षट्कृत्तिकाः समाहूय स्तन्यमेनमपा
पयत् २३ प्रत्यहंकृत्तिकापूर्वं भवताग्रे पमानरः इतिविष्णुवचः श्रुत्वा कृत्तिकाः प हृताः पुनः २४ सुख
योगेवहंत्यस्तं प्रस्तवन्त्यः पयस्तनैः आगमप्रीतिसंयुक्ताः स्तन्यमेनमपाययन् २५ आज्ञयास्त्वागतास्तासु एम
समीपे सोपि शंभवः तासामनुग्रहार्थाय षोढा मूर्तिरभूत्क्षणात् २६ ताश्चीक्ष्य सुकुमारं तं कुमारं पद्म
रोपरि प्रत्येकमेकमादाय प्रहृष्टेनांतरात्मना २७ प्रस्तवन्यश्च ताः सर्वा जिघ्निरे मुखमाननैः अथयन्नेस्तनौघा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्ताः तासामास्यावलोककाः २८ क्रमशः पाययित्वा तान् कृत्तिकास्तन्यमात्मनः पद्मे सुशाययित्वा
तु लालयंत्यस्तदोषिरे २९ निद्राति स्मरतः कश्चिज्जहासान्यो मुहुर्मुहुः आरोदीदपरोत्यर्थमप
रः क्रोष्टाति भर्त्सितः ३० जहास च रुरोदारान् निद्रापरवशो मुहुः पादांगुष्ठं स्वमास्येन्यः कोरेण
निदधौ रुदन् ३१ अंजलिं स्वास्यदेशेन्यः करयोः संन्यवेशयत् पुनः क्षणांतरेणान्यश्चचार
स्वोरसापरः ३२ जानुभ्यां चैव हस्ताभ्यां किंचित्किंचिच्चलालह पद्भ्यां द्वित्रीणि चाप्यन्यो जगा
म च पपात च ३३ अपरस्तु किपदूरमंघ्रिभ्यामाप मेदिनी मातुः करावलंबेन महीमन्यो जगाम च ३४
उत्पतन्निपतन्नन्यो वभ्राम शिवसंभवः पुनः क्षणांतरेणैव परो मुहुरुपप्लवत् ३५ अर्धपादपरोत्यर्थमे
कपादगतिः परः मस्त्रवन्मेषवच्चान्यो मस्तकेनाग्रदर्भके ३६ परस्परं समाश्लिष्य बाहुयुद्धपरौ परौ परत्र
हैवमतनोद्बालभावमुपागतं ३७ षोढा विभक्तमिव तं निर्विशंक्रीडयारसं चेष्टितानि शिशूनां नाविचित्राणि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लोकयवै ३८ विस्मयंत्यः परांप्रीतिंतेषुसर्वेषुचक्रिरे विस्मुमुखावैदेवास्तेदृष्ट्वात्हृष्टतनूरुहाः ३९ चरित्राणिविचि
त्राणिकृतकृत्यास्तदाभवन् ईशितैकोर्थिनोस्माभिरधिकः पंचजज्ञिरे ४० षड्भिरेतैःसमुद्दर्तुंशक्यावैलो
ककंटकाः इतिविविधमभीष्टंचिंतयित्वामरेंद्रामनसिशिवकुमारान्षट्चकांताननंतान् सुखमधिकम
वापुर्मोक्षसाम्राज्यलक्ष्म्याः किमिवजगतिनस्यात्सौख्यमीशेप्रसन्ने ४१ इतिश्रीशंकरसंहितायांसंभवकां
डेषड्विंशोध्यायः २६ सूतः यदातेजांसिदेवास्त्रिसमुद्भूतानिशीघ्रवै अमराद्दद्दुर्भीतास्तदादेव्यपिपार्वती १
अंकमेषांपरित्यज्यसंभ्रांतहृदयाद्रुवत् प्रस्खलत्पादकमलानिशांताभिमुखीमुहुः २ स्खलतोःपादयोर्वेगा
न्मंजीररवचितानिवै रत्नानिमार्गपर्यंतेनवापिस्वगलन्क्षणात् ३ नेजःसूक्ष्मतनुषुनिर्भयेषुसुरेषुच
देवीविदितवृत्तांतादेवांस्तानशपत्क्रुधा यस्मादंगात्सुरापूर्यंमामकादात्मसंभवं नसंहृतिस्मतयूयमन
पत्यामविष्यथ ५ शप्त्वैवंसहसादेवान्देवीहिमगिरींद्रजा पुनरंकमुमाभर्तुरगमत्सादरंशुचिस्मिता ६ रत्नेषुवि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऋषयऊचुः भवताकथितावृत्तिर्वीरमाहेश्वरार्चिता अस्माकंसांप्रतंविद्धिषट्स्थलज्ञाननिर्णयं १ सूतउवाच वक्ष्येभाग्यवतांश्रेष्ठाःषट्
स्थलानिसमासतः यानिशक्तिधरायाहशंकरःपार्वतीपतिः २ पुराकैलासशिखरेनानारत्नविभूषिते समासीनंमहादेवंपार्व
त्यासहितंशिवं ३ गंगाधरंविरूपाक्षंश्रीकंठममितौजसं पप्रच्छप्रणतोभूत्वास्कंदः षट्स्थलनिर्णयं ॥४॥ देवदेवमहादेववदषट्
स्थलनिर्णयं कृपयातवदेवेशभवानिभजकोनम ५ शिवउवाच वदामिसंग्रहेणाहंशृणुषट्स्थलनिर्णयं सारंसमस्तशास्त्रे
षुरहस्यंचषडानन ६ सर्वेषांस्थानभूतत्वाल्लयभूतत्वात्सदा तत्वानांमहदादीनांस्थलमित्यभिधीयते ७ स्थीयतेलीयतेयस्मि
न्मुक्तसंसारपद्धति तदेवस्थलमित्युक्तंस्थलशब्दविशारदैः ८ स्थानेसर्वाश्रेष्ठमनंतेसच्चिदानंदरूपेण यस्मिन्ब्रह्मणिलीये
तमायंचमस्तत्स्थलंभवेत् ९ तद्ब्रह्मस्थलरूपेणस्वशक्त्याषड्विधंभवेत् मोक्षमार्गैकसाधनंवीरमाहेश्वरव्रतं १० तस्यनामा
निवक्ष्यामिस्वरूपंतेसमासतः यत्तज्ज्ञानैर्नरोमुक्तिमनायासेनगच्छति ११ भक्तोमाहेश्वरश्चैवप्रसादिप्राणलिंगकः शरणंशिवलिंगे
क्यषट्स्थलानममप्रियान् १२ सदाचारेशिवेभक्तिलिंगंजंगमएकधीः लांछनेशरण्येभक्तिसम्यक्स्थलमुत्तमं १३ परस्त्रीषुपरा
मर्षवर्जितोभावशुद्धिमान् शिवलिंगनियुक्तात्मामाहेश्वरमहास्थलं १४ लिंगार्पितपदार्थंचभोक्तालिंगसमाहितः अनर्पितविसर्जे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शंकर: चप्रसादिस्थलधीमतः १५ वायुप्राणगुणालिंगेलिंगप्राणसमाहितः सुखदुःखभयंनास्तिप्राणलिंगस्थलेभवेत् १६ पतिलिंग अ· ४
सतीचाहद्वादियुक्तस्वयंप्रभुः प्रायंचिकसुखंनास्तिशरणंस्थलमुत्तमं १७ षडूर्मयश्चषड्वर्गानास्तिचाष्टविधार्चनं निर्भावोनि
जलिंगैक्यःशिवैकपूर्णयोगवत् १८ जलगंधअक्षतापुष्प सुगंधधूपतथादीप नैवेद्यफलतांबूलदेआरोप नाहिअष्टविधा
र्चन १९ साक्षिस्कृतिआवाहानवस्तनाभिमुखतरोधवारांघ्रिवार्यापूजाभिषेकवस्त्रउपवितालंक्रियालेयनंपुष्पधूपसुदीपकौ
हारत्नांबूलमुग्रे शितछत्रचामरतालंव्रतनयनोत्सनादिवाघस्तुतिः प्रादक्षिण्यपरिक्रमणप्रणयनंसंप्रार्थनात्मार्पणं परियूद्वा
सनमुद्रेनचकथितापूजोपचारंप्रियात् १९ पूर्वंपूर्वंसाधनंस्यात्साध्यास्याउत्तरोत्तरं उत्तरोत्तरवैशिष्टमेतासांपरिकीर्तितं २०
अभ्यस्यपूर्वंपूर्वंस्यादुत्तरोत्तरमाश्रयेत् अभिन्यचोत्तरंमर्त्यः स्वयंपूर्वंपरित्यजेत् २१ एतानभ्यसतः पुंसोमुक्तिःपाणितलेस्थि
ता नतस्यदुर्लभंकिंचित्रिषुलोकेषुविद्यते २१ षट्स्थलाभ्यासयोगेनमुक्तिः सायोज्यलक्षणा प्राप्यतेशिवभक्तैश्चनाना एम·
कर्मरतैर्जनैः २२ अतःसदाचाररतःसमाधिमान्शिवस्यलिंगार्चनतत्परोजनः शिवस्वरूपंपरमार्थमादरात्सदाभ्यसेत्षट्स्थल
मेवभावतः २३ षट्स्थलानिविजयंतिमहांतोवंघास्तएवविजितेंद्रियग्रास्त्ववाप्ते: सम्राट्स्वराडपिचयत्तूणपनेतनत्शैवंप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दं जगतितेसमवाप्नुवंति २४ एवंषट्स्थलनिर्णयंशिवपदप्राप्त्येकहेतुंसदायःसेवेतकराब्जपीठनिहितःश्रीकंठलिंगार्चकः सज्ञानी
सपुरातनःसचमहामाहेश्वरेषूत्तमोमर्त्यस्तेनजगत्त्रयेनसमोवेद्यंतदेवोपिच २५ अतःसमस्तंपरिवर्जयित्वासुखाभिलाषीप
रिपूर्णचित्ताः स्थलोक्तसम्यक्चित्तचेतदान्तिर्निवेश्यतद्भाववित्तारवान्स्यात् २६ एतदस्यपरेप्राहुःषट्स्थलज्ञानवित्तमाः
भक्त्यादिज्ञानपर्यंतंसाध्यसाधकभावतः २७ भक्तिकर्मक्षयोबुद्धिर्विरोचारोदर्पसंक्षयः सम्यग्ज्ञानमितिप्राज्ञैः स्थलषट्कमु
दाहृतं २८ क्रियया चोत्तमा भक्तिप्राप्यते शिवचिंतकैः भक्त्याकर्मक्षयस्तस्माद्स्थलधीषणो भवेत् २९ धियावस्तुविचा
रःस्याद्विचाराज्ज्ञानमद्वयं सस्तस्माज्ज्ञानंततो क्षोभमोक्षाद्दियते परं ३० सम्यग्ज्ञानसमूलं हि भक्तिरव्यभिचारिणी जन्मांतरकृ
तात्पुण्यात्संजायतेसौसदाशिवः ३१ सम्यग्ज्ञानस्यमूलं हि भक्तिरव्यभिचारिणी सच्चिदानंदसंपूर्णशिवलिंगस्वरूपिणी ३२
शिवस्यभक्तिमूलं हि वीरमाहेश्वरैर्जनैः सर्वदापुंसां सततेलोकेषु दुर्लभ ३३ पुराकृतमहापुण्यंपरियाकवशेनचा वीरमाहेश्व
रसंगःसुलभःकस्यचिद्भवेत् ३४ वीरमाहेश्वरैः संगःपरोभवतियद्दिने तद्दिनैरेवरोमासैःप्राप्नोतिशिववेदिनं ३५ गुरुप्रसा
दाद्दिगवेष्टलिंगंसमर्चयंतंस्वकराब्जपीठे षडशभक्तोविविधोपचारैर्नरस्तमालोक्यविमुक्तिमेति ३६ भवार्णवंवर्तुमिहेच्छतांन्ट

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पात्मुणयएव: सुलभ: सुखमद: सर्वोरमाहेश्वरसंगमाद्यतोजगत्त्रयेनास्मिन्विचारितेसति ३७ मल्लिंगमस्तकाग्रे गेधृत्वाशक्रपुरोग
मा: देवं मां लिंगमध्यस्थं पूज्यस्वस्वंपदंययु: ३८ उरस्थलेहरेर्लिंगं ध्यात्वामूर्ध्निपितामहं लिंगस्थलेसमाराध्यस्वंस्वंपदमवाप
तु: ३९ लक्ष्मीसरस्वतीमुख्योदेव्योमल्लिंगधारणात् धृत्वानिजांगेतेलिनेभूत्वाजग्मु:परंसुखं ४० केचिन्महांतोहृदिभा
वलिंगंसंपूज्यसत्सुस्वरूपमीशा: मुक्तिप्रयाता:परमात्मलीनेमन:प्रचारंपरिपूर्वंर्णभावा: ४१ प्राणद्वयंलिंगमनात्मभावा
त्संपूजइत्वागुहनाभिकंठे केचिन्मुनींद्रापरमव्ययंततत्रोवप्रयाताहठभक्तियुक्ता: ४२ अन्येपरेयोगपराहृदंबुजेज्वलंत
नमंगुष्ठमिमंपुराणं लिंगस्वरूपंशिवमप्रमेयंसंभाव्यतस्मिन्लयमापुरार्या: ४३ भ्रूघ्राणमध्येप्यविमुक्तदेशेविश्वेश्वराख्यं
परमात्मलिंगं ध्यानामृताशक्तधियोमहांतोध्यात्वापरामुक्तिमवापुरेव ४४ यद्ब्रह्मरंध्रस्थसहस्रपत्रेमध्येस्फुरंतंरविकोटि
भासं मामेकभावेनविभावयंतितेमेप्रियानित्यविमुक्तिभाज: ४५ येवैपृथक्त्वेनसमर्चयंतोमामद्वयंतेपृथगभवेत् तेनामदी

योभवपाशबद्धसंसारदीर्घोध्वनिनैगमास्ते ४६ हेवत्सलिंगांगपदंविशोध्यतस्मिन्यथान्योन्यविशुद्धभावा: हित्वाविरुद्धाप्रतिपस्व
रूपामात्मेतिसंबंधपदार्थयेषां ४७ एवंहिलिंगांगपदार्थसंविद्यस्यदृढाभ्यासवशादिहास्ति तेमामुपैष्यंतिविशुद्धभावानावर्त्तय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यंतिस्मपुनर्भवाय ४८ तस्मादिहप्राणशिवैकभाजः संपूजयेद्योभुवनैकवंद्यं संसारबंधविहीनभावं स्वज्ञानमेतिस्थलषट्कजंतत्
४९ तवाथवाषट्स्थलमन्यदस्ति शिवांगभक्तं श्रुतिमंत्रसिद्धं परंपदंशुद्धमनंतरूपंवदाम्यहंगुल्यतमंस्ववेद्यं ५० सर्वज्ञतादीनिनिसर्ग
भक्तान्यंगानितत्षट्स्थलमाहुरार्याः अंगीकृतत्वाद्धिशिवेननित्यंवक्ष्यामिह्येतानिममप्रियाणि ५१ सर्वज्ञतातृप्तिरनादिबोध
स्वतंत्रतानित्यमलुप्तशक्तिः अनंतशक्तिर्विभवोविधिज्ञाःषडाहुरंगान्यथषट्स्थलानि ५२ सर्वज्ञतादिस्थलषट्कजातंसर्वं
हठाभ्यासवशाद्विभाति येषांमगुरुभक्त्याममभक्तियोगात्मुक्त्यानिभुक्त्वावहैवमुक्ताः ५३ तस्मात्परब्रह्मसुखस्वरूपं
स्वमाययाषट्स्थलभेदभिन्नं सच्चिन्मयंशंकरमक्षयंतत् योवेदनायातिपुनर्भवंसः ५४ एवंषट्स्थलविज्ञानंप्रसगुप्तप्रमा
णता गुरुभक्त्यास्वानुभूत्यायस्यभातिससर्ववित् ५५ सुदुर्लभमितिज्ञानंनराणामुत्तमोत्तमं सद्भक्तिरहितानांचदुर्दर्ज्ञानांषडा
नन ५६ तद्भावाम्नतत्स्थानांतराचारानुवर्तिनां जायतेपरमंज्ञानंस्थलषट्कोद्भवंवृणां ५७ यःशैवषट्स्थलज्ञानसामर्थ्योक
लनाद्दृढा भातिधीर्दैर्येणस्वच्छे सवैमाहेश्वरोजनः ५८ सभवार्णवमत्युग्रंदुस्तरंदुस्तरंगकं तीर्त्वामांपरमात्मानमेति नावर्ततेते
पुनः ५९ तस्यमाहेश्वरस्यैषानिष्ठावक्तुंनशक्यते मयासर्वविदाचापिकिमुतान्यैरजादिभिः ६० धृतलिंगसदाचारनिरतंद्विजपुंगवं वी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रमाहेश्वरंसम्यक्पूजयेद्भक्तियान्नरः ६१ सुपूजितेतुमद्भक्तैर्मनुजैर्भक्तिसंयुतैः पूजिताः सकलादेवाभवेयुर्नात्रसंशयः ६२ म
द्भक्तहृदयांभोजेसदातिष्ठतिषण्मुख यत्रतिष्ठाम्यहंनित्यंतत्रमत्संभवाः सुराः ६३ तिष्ठंतिभक्तिनम्रास्तेमत्पूजासक्तमान
साः तस्मिन्संपूजितेमर्त्यैःसर्वेदेवाःसुपूजिताः ६४ कृमिकीटपतंगेभ्यःपशवःप्रश्रयाधिकाः पशुभ्योपिनराःश्रेष्ठास्तेषुश्रे
ष्ठाद्विजातयः ६५ द्विजातिष्वधिकाविप्राःविप्रेषुकृतबुद्धयः कृतबुद्धिषुसर्वेषुमताःसंन्यासिनोधिकाः ६६ तेषुविज्ञातितः
श्रेष्ठातेषुशंकरपूजिकः तेषुश्रेष्ठामहाभागाः ममलिंगांगसंगिनः ६७ लिंगांगसंगिष्वधिकःषट्स्थलज्ञानवान्पुमान्
तस्मादप्यधिकोनास्तित्रिषुलोकेषुसर्वदा ६८ सवंद्यःसर्वदापूज्यःसंसारविजिगीषुभिः बहुनोक्तेनकिंवत्सत्वंसएवाहंनसंशयः
६९ सर्वमुक्तंसमासेनस्थलनिर्णयवेदनं गोप्यंसमस्तशास्त्रेषुतवस्नेहान्मयोदितं ७० बहुनोक्तेनकिंवत्ससारमेतन्मयोदितं त
स्मादेवंविदित्वातुषट्स्थलज्ञानवान्भव ७१ सकलनिगमसारंषट्स्थलज्ञानमेतत्भवविपिनकुठारंसर्वतंत्रप्रसिद्धं परमसुखस
मानामप्येकहेतुकमनानवकथितमशेषंवत्सतंसदाप्रेमभूम्ने ७२ त्वमयिकथयधर्मंभक्तियुक्तोहिसर्वेविजितमदनरागद्वेषलोभेंद्रि
याय गुणगणनिलयायप्राणलिंगैकभाजेगुरुचरणसरोजध्यानयुक्तायवत्स ७३ अशिष्टायाविरक्तायदेवताद्वेषणायच लिंगधा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रणद्वरायनवादीस्त्वंकदाचन ७४ सूतउवाच इत्युक्त्वाशंकरःक्रौंचहारणायामितौजसे सौगौरीमुखाब्जविन्यस्तदृष्टीनुष्टावभूवसा
७५ श्रुत्वाशिवमुखोक्तीतंस्कंदःषट्स्थलनिर्णयं प्रणम्यदंडवद्भूमौभक्त्यापरवशोगुहः ७६ भक्त्यापरवशोभूत्वाकिंचित्कालमहे
श्वरः त्वत्प्रसंज्ञोमहादेवंस्कंदस्तुष्टावशंकरं ७७ स्कंदउवाच नमःशिवायसोमायषट्स्थलब्रह्मआरूपिणे सदानंदस्वरूपा
यसम्यक्ज्ञानप्रदायते ७८ नीलकंठायनित्यायनिर्विकारायशंभवे निरंजनायसार्वीयत्र्यंबकायनमोनमः ७९ गंगाधरं
विरूपाक्षंचंद्रलेखावतंसकं सर्वज्ञंसर्वगंशर्वंवंदेसर्वप्रियंशिवं ८० आधारंसर्वलोकानामनाधारमविक्रियं निस्तरंगंसुखांभो
धिंनमामीशानमव्ययं ८१ कलाधारंकलातीतंकालकालंकपर्दिनं कामादिरहितंशुद्धंवंदेभूतेशमक्षरं ८२ ब्रह्माविष्णुसुरें
द्राणांकारणंकारणातिगं नागालंकृतसर्वांगंनमामिसकलेश्वरं ८३ निलकंठंनिर्मलत्वंसच्चिन्मयंसंसारमोचकं सांबंसदात्मकं
वंदेसदाशिवंतमीश्वरं ८४ अव्यक्तव्यक्तसद्भावकारणंकृत्तिवाससं कल्पांतमादिपुरुषंनमामिगिरिजाधवं ८५ गिर्वाणार्चि
तपादाब्जंगीततांडवमंडितं गिरिशंगिरिःपतिंतुभ्यंवंदेहंसर्वसाक्षिणं ८६ उमाकुचाब्जलावण्यमयतलक्षणालयं नमोविश्वात्मनेतु
भ्यंस्वभावामलतेजसे ८७ यत्प्रसादयोगीद्राज्ञानवंतःपरंययुः तंत्वांप्रपद्येदेवेशंसर्वमंगलकारणं ८८ यस्याच्चराचरंविश्वंजाय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं।करः नेयत्रतिष्ठन्ति लियन्ते सततं यत्र प्रपद्येहं महेश्वरं ८९ त्वत्तस्सारात्जगन्नाथ ज्ञातं सर्वं मयाधुना शैवं च सर्वसिद्धांतं षट्स्थलब्रह्मवेदनं ९० त्वत्स्वरूपपरिज्ञानसद्दांसपूर्णवेदनं तस्मात्सर्वं परित्यज्य त्वामेव शरणं गतः ९१ सूत उवाच स्तुत्वेति शंकरमजं करुणालयं तं संसारमोचकमखंडसुखस्वरूपं स्कंदो बिकाधवयदांबुजभक्तिभावाद्दानंदनिर्भरमनासमवैन्निजं तत् ९२ युष्माकमद्य कथितं श्रुतितंत्रगोप्यं मुक्तोपाणोद्भवेन घटनापठितयान् सारश्च षट्स्थलनिर्णये षु लोके नान्यस्ततः परतरो भववंधशांत्यै ९३ यूयं श्रद्धान्विता विप्राः स्थलनिर्णयवेदनं व्याकुरुध्वं प्रशांतेन भक्तिभावेन मुक्तिदं ९४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भगवन्श्रोतुमिच्छामो वीरमाहेश्वरक्रमं तमस्माकं महाभाग वक्तुमर्हसि सत्तम १ सूत उवाच वक्ष्ये युष्माकमप्याहं शृ
णुत श्रद्धयान्विताः महेश्वरमुखोद्गीतं वीरमाहेश्वराक्रमं २ पुरा कैलासशिखरे नानामुनिगणाश्रिते विद्याधरगणाकी
र्णे देवगंधर्वसेविते ३ शकुंतसंघसंघुष्टे भ्रमद्भृंगजशोभिते अप्सरोगणसंबाधे सर्वाश्चर्यमनोहरे ४ हेमप्राकारसंयुक्ते।
रत्नवप्रविराजिते पीयूषपरिखाक्रांते नवद्वारविभूषिते ५ पुरमस्ति महारम्यं रत्नतोरणमंडितं पुरोपकंठोपवनवनमाला
विराजितं ६ वापीतटाकसंबद्धपर्यंतं गोपुरान्वितं प्रासादमालासंलीढव्योममंडलमुत्तमं ७ नानारत्नौघखचितं स्वर्ण
पत्रमिवावृतैः पुण्यकृद्भिरवाप्यं तदप्राप्यं पापकर्मभिः ८ तत्रास्ति मंदिरं रम्यं चित्रभित्तिसमन्वितं नानारत्नौघखचितं स
हस्रस्तंभसंमितं ९ तत्र सिंहासने शुद्धे सहस्रारविराजिते मृदुतूलाभिरचिते तल्पास्तरणशोभिते १० शातकुंभमयं दिव्यं सू
क्ष्मवस्त्रांतरच्छदे परितः कीर्णमंदारपुष्पमालाविभूषिते ११ समासीनं महादेवं योगिध्यानैकगोचरं गिरिजाश्रितवा
मांकं स्वात्मानंदांबुधिस्थितं १२ सुरसीमंतिनीहस्तविन्यस्तसितचामरैः वामभागस्थविलसच्छ्रीविन्यस्तकरपल्लवं १३
कृतांजलिपुटेनाज्ञजनतुषाश्रुतिगोचरैः स्तूयमानगुणव्रातः स्तवैः सर्वेश्वरेश्वरः १४ नंदिना वेत्रहस्तेन तत्क्रमाहितदृष्टिना ।। शि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं·क·सं· क्षितांकेपिचयत्नागमाहर्नीनलालसः १५ स्वयंस्वमेवध्यायंतंशिवंभक्तहितेरतं ज्ञानशास्त्रंमुनीन्द्राणांव्याकुर्वंतंविमुक्तिदं
१६ भक्त्याप्रणम्यदेवेशंभगवंतंत्रिलोचनं सर्वलोकोपकारायप्रष्टुंशिखिवाहनः १७ स्कंदउवाच भगवन्श्रोतुमिच्छामिस
र्वप्राणिहितंपरं केचिल्लिंगार्चनंपीठेप्रशस्तंतुप्रचक्षते १८ केचिच्छैवागमाभिज्ञाःप्राणलिंगार्चनेपराः लिंगेप्राणंसमादाय
करपीठेशिवार्चनं १९ प्रशस्तंतन्ममेदेवब्रूहिकिंमुख्यमेतयोः संशयंमेमहांतंचछेत्तुमर्हसिशंकर २० श्रीशंकरउवाच सा
धुपृष्टंत्वयावत्सवक्ष्यामितदशेषतः वेदागमेपुराणेषुसारंगोप्यंमनोहरं २१ भक्तिस्थितानृणांयस्मिन्नलेशोपिहिजन्मनि॥
सभेदीयक्ष्यन्तुदैवेनप्रायोभक्तिवर्जितः २२ साभक्तिर्द्विविधाज्ञेयाबाह्याभ्यंतरभेदतः बाह्यास्थूलांतरःसूक्ष्मावीरमाहेश्वरा
हता २३ सिंहासनेभुदेशेसुरम्येरत्नचित्रके शिवलिंगस्यपूजायांसाबाह्याभक्तिरुच्यते २४ लिंगेप्राणंसमाधायप्राणेलिंगं राम·
गुरुंभवेत् स्वशरीरेमनः कृत्वानकिंचिच्चिंतयेदपि २५ सायस्मिन्वर्ततेनेनस्यजीवन्भर्जवीजवत् प्रारब्धकर्मभोगांतमेवसंसार
दर्शनं २६ तस्यवक्ष्यामहेवत्सशिवलिंगार्चनक्रमं संसारदुःखरोगस्यभेषजंमुक्तिसाधनं २७ नित्यानित्यविचारवान्निहपर
त्रोपस्थितार्थरतिः शमाद्यष्टांगसमन्वितः सुचरितोमोक्षार्थितोत्सुक्यवान् सत्यानंदपरप्रकाशपरिपूर्णात्मावबोधान्वितः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्मात्कृत्यविवेकेनगुरुरुवरंश्रेयान्नरोभक्तिमान् २८ नत्वाभक्तिपुरस्सरंगुरुवरंविज्ञापयत्साध्वेनः स्थित्वाजन्मशतागतोस्वभया
भीतोस्मिमांपाहिभो येनायंभवपादपःसुखफलःशोषंसमूलंप्रयात्याशत्वमेवलेननतत्कथयमेमोक्षप्रदंसद्गुरो २९ इत्यु
क्तोगुरुरादरेणकृपयाशिष्यंसमीपस्थितंस्पृष्ट्वापाणितलेनसाधुगदितेप्रीतोस्मिवत्सत्वयासंसारार्णवतारकेपरशिवेलिंगस्व
रूपेमलेशापंजीवकलाधरंतवनिवासस्त्वंतदास्यःपरः ३० इत्युक्त्वापूर्णकलशंतंदुलोपरिसंस्थितं अभिमंत्र्यसतारेणश्रीमतं
चाम्रदलेनच ३१ स्वयंचप्राङ्मुखोभूत्वागोमयेनोपलिंपिते मंडलेस्थापितेशिष्यमुत्तराभिमुखंगुरुः ३२ शिष्यदेहेततःशक्ति
पातंकुर्यात्स्वसिद्धये पीठस्थेशिवलिंगेतुशिष्यप्राणंनिधायच ३३ दत्वाशिष्यायतल्लिंगंश्रद्धाभक्तियुतायसः पूजायेत्प्राणलिं
गत्वायावज्जीवंप्रतिज्ञया ३४ पुनर्भवोननेवत्सविद्यतेमात्यजानिशं इत्युक्त्वाभिमुखंशिष्यमानीयकृपयापुनः ३५ वीरमाहे
श्वरंधर्मंक्रमाद्उपदिशेद्गुरुः ३६ वत्सलिंगार्चनंनित्यंत्रिकालंकुरुभक्तितः पूजाद्रव्याणिसंशोध्यशुचित्वगतमानसः ३७ हस्ते
सिंहासनेलिंगमनुमादेनधारय ३८ प्रमादान्पतितेनलिंगेसहप्राणान्परित्यज कुरुष्ववत्सोपचारान्षोडशस्नानपूर्वकान् ३९
स्नानेसमंत्रासलिलेनहिपूर्णभावेवस्त्रंत्रिशक्तिसंयुतमथनियज्ञसूत्रं दिव्यासुगंधमथधूपमतद्यासनाश्चशाद्वादिपुष्पाणिसमर्पये

CC-0: Jangamwadi Math Collection. Digitized by eGangotri

शंकरः यमंगलानि ४० ब्रह्मामनो हंकारानि वित्तधूपं भो ज्ञादि पंचेंद्रियदीपमंगन द्रासनातेलयुतं चदेहि जीवोपहारं सुखदुःखवासे
४१ गुणत्रयारव्यातांबूलं प्राणार्पण नमस्कृतिः शांतिपुष्पांजलिं देहि चैकभाव विसर्जनं ४२ एवमभ्यंतरं द्रव्यसंभृतं शिव
पूजनं ज्ञानानिधेहि सततं लिंगं वस्त्रेनवेष्टितं ४३ मस्तके कंधरे कक्षे वक्षसी च करस्थले नाभेरधस्तात्सततं प्रमादाच्चैव धा
रय ४४ इत्यादिष्टो यगुरुणा शिष्यः श्रद्धासमन्वितः देहं दारात्मनं प्राणान् सर्वं तस्मै निवेदयेत् ४५ यस्य देहे यथा भक्तिः
यथा देवे तथा गुरौ तस्य पाणितले मुक्तिः स्थिता हस्तस्थबिल्ववत् ४६ अत्याश्रमि प्राणलिंगसंबंधि भस्म गुर्वनः कंथाकम
डलुभीक्षापात्रं दंडं च धारय ४७ पंचमहामुद्रा यस्मिन्यस्मिन्संवीतिहि स निराशरणमभेत्य सर्वभावेन पूजयेत् ४८ पंचमुद्रान्वि
तो धर्मो यस्मिन्वत्साय वर्तते स वंद्यः सर्वदा पूज्यः प्राणलिंगसमन्वितः ४९ त्रिपुंड्रधारणं कुर्यात भस्मना सजलेन च अ रम·
ग्निहोत्रसमुत्थेन विरजानलजेन वा ५० सर्वांगोधूलनं कुर्यात्सद्योजातादिमंत्रतः अग्निरित्यादिभिर्वापि षड्भिरथर्वणो
दितैः ५१ विचारयेत्सदाज्ञानं साधनान्यखिलानि च पुराणागमवेदेषु प्राणलिंगसमन्वितं ५२ भक्तिश्रद्धाति निस्सामिरति
हीतिः रामोदया रुद्राक्षधारणं भस्मज्ञानांगानि प्रचक्षते ५३ तेषां मुख्यतमं भस्मरुद्राक्षाणां तु धारणं यो धत्ते भस्मरुद्राक्ष

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धारणासंभवेच्छिवः ५४ वर्णीवालापसोवापिशुद्रोवायदिभूतिरः साभूतिःसर्वदाधार्यास्तानोचेद्रोहिमसेवसः ५५ यस्यधीर्विपरि
तास्यान्भस्मरुद्राक्षधारणे द्वेषोवाजायतस्सविद्याज्जारसंभवः ५६ पुराकृतमहापापवागुरावशावर्जितः नरायपशुभूताय
शिवधर्मोनरोचते ५७ देवतानामहंश्रेष्ठंमंत्राणांचषडक्षरं वर्णानांब्राह्मणोयद्वद्भस्मोक्तोंगधार्यां ५८ विशेषतः प्राणलिं
गसंबंधिभस्मधारयेत् रुद्राक्षमालामनिशंश्रद्धाभक्तिसमन्वितः ५९ मस्तकेकर्णयोः कंठेबाह्वोर्मध्येप्रकोष्ठकेरुद्रा
क्षाणांयथाशक्तिधारयेदुपवीतकं ६० वदेतत्सत्यंहितंपथ्यंप्रियंधर्मसमन्वितं वचनंशिवभूतेषुनकुर्वीतकदाचन ६१
पंचमुद्रान्वितंप्राणलिंगसंबंधिनंनरः पूजयेद्दूरेणैवयदिच्छेत्परमांगतिं ६२ पूज्यतेपत्रमभ्यक्तोवीरमाहेश्वरोजनैः न
चाहंपूजितस्तस्मैदास्यामिष्टंषडानन ६३ यस्यगेहंसमुद्दिश्यवानिमाहेश्वरोजनः क्रीडंतितस्यपितरोयास्यामःपरमांग
तिं ६४ लिंगार्चनंपरस्यगृहेशिवस्यकुर्वीतवेतस्यगृहंपवित्रं मातापितृतार्थसफलंचजन्मधन्यःपितापुण्यतमोन्वयश्च ६५
वंसेतेगणनायकास्तितिनलंगत्वाविमुक्तामयासंभूतास्सकलासुजातिषुपुनर्लिंगार्चनेनतत्पराः संस्थाप्योत्तमवीरशैववप
दवीलोकेहितार्थंनृणांमुद्रापंचदधंतएवविचरंत्येतेसमेष्वंतिमां ६६ इतिपरमरहस्यंवेदांतसारंसकलसुरमुनीद्रैराद्दतं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शंकर.

भक्तिमद्भिः कथितं सकलदुःखध्वंसकं तु म्यमेतत् त्वमपि कथय धर्मं प्राणलिंगैक्यभाजं ६७ सूत उवाच इत्यौरितं शंभुसुता
रविंदाद्दाकर्ण्य तं प्राणलिंगैक्यधर्मं स्कंधो भवभक्तिसुधांबुराशौ मग्नो मुदा बाष्पपरीतनेत्रः ६८ लब्धसंज्ञो महायोगी भ
क्त्या परवशो गुह ः कृतार्थोस्मि कृतार्थोस्मीत्युक्त्वा चांबं ननाम सः ६९ यूयं भाग्यवतां श्रेष्ठा सर्वे धर्मोत्तमोत्तमं स्थाप
यध्वमिमं धर्मं वीरशैवमुनीश्वराः ७० जंगमा वीरशैवस्था ममातिप्रियकारिणः भस्मरुद्राक्षलिंगांकाः स्त्रीदारादिविवर्जि
ताः ७१ भ्रमाद्वा यदि मोहेन मैथुनं क्रियते ऽधमाः भ्रष्टा भवंति ते लोके चांडालाद्विनिंदिताः ७२ काषायांबरसंभूषाः सदाचा
रेण शोभिताः शिवाराध्यास्सदा पूज्या लिंगपूजापरायणाः ७३ स्त्रीजातिभिः कृतान्नादिपरित्यक्ताश्च पावनाः शिवभानुरागा
श्च भक्तैः पूज्यास्सनातनाः ७४ भविस्त्रीसंगरहिता भविभोजनवर्जिताः स्वत्कर्मनिरता नित्यं षाड्विधस्नानतत्पराः ७५ त एम
दालाभे तु नैवेद्यं पूजायां चानुमोदिनः शिवदीक्षां समासाद्य गुरुदत्तेष्टलिंगकाः ७६ गुरुं विना दीक्षाहीना लिंगिनः पत
काः स्मृताः शैवागमानुरक्ताश्च शिवध्यानपरायणाः ।७७ शैवेतरेषु दीक्षादिलिंगधारणवर्जितं लोभाद्वा यदि मोहेन कु
र्वते लिंगधारणं ७८ सदूषितः परिभ्रष्टो बहिष्कार्यो बुधैः सदा लक्षणैरेभिरुत्कृष्टाश्चान्यथा पातिता भुवि ७९ भूरुद्राजे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऋषयऊचुः॥ ॥भगवन्सर्वधर्मज्ञवीरमाहेश्वरोजनः॥वृहियांवृत्तिमाश्रित्यविचरेत्पृथिवीमिमां १ सूतउवाच॥वक्ष्यामिसंग्रहे
णाहंयुष्माकंमुनिसत्तमाः॥यत्स्कंदोवदाराणायाहनीलकंठोंविकापतिः॥२॥कैलासशिखरेरम्येसुखासीनंमहेश्वरं॥प्रणम्य
पतोभूत्वाकृतांजलिपुटःपुरा॥३॥स्कंदउवाच॥नीलकंठविरूपाक्षवीरमाहेश्वराश्रित वृत्तिंकथयदेवेमोक्षमार्गैकसाधनं
४ श्रीशंकरउवाच॥वक्ष्येभागवतांश्रेष्ठसंग्रहेणषडानन वीरमाहेश्वरस्यैतांवृत्तिंवेदागमोदितां ५ यदालिंगांगसंबंधिनस्स
देशिकात्तया॥तदापंचमहामुद्राधारयन्भुद्रमानसः ६ विभूतिघुटिकाभोस्मापात्रंदंडकमंडलुं कंपांशोनापनोहार्थंभुद्रभा
वसमन्वितः ७ यतःकुतश्चिदात्मीयःशास्त्रेणैवविचारयेत् शिवोदितानिलिंगांगसंबंधार्थकृतानिच ८ कोहंमेमोक्षःकेनः
स्यात्संसारंकिंपरत्रवान् इत्यालोच्यधियापक्वचिंतयित्वाविचारयेत् ९ किंस्वीत्ततंशरीरंस्यात्भूतग्राममविनिर्मितं जडमन्नस
मुद्भूतंमनवुद्धिमुपेतिच॥१०॥विनिश्चैवनतत्वंस्यात्रेंद्रियाणिनधीर्मनः नाहंकृतिर्नेचित्तंस्यान्नमायानचकर्मच॥११॥इति
निश्चित्यमनसापदृक्कंगुरुणापुरा॥कृत्वालिंगांगसंबंधानदेवविस्मरेत्सुधीः॥१२॥लिंगंकिमंगमितिचसंबंधश्चाकिमेतयोः
लिंगांगसंबंधपदान्येवमेवविचारयेत् १३॥लिंगरूपोमहादेवःसच्चिदानंदलक्षणः॥अंगरूपोहिजीवात्माभःवभावनि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यं शिवः १४ तमहं सोऽस्मीति सन्धिः लिंगरूपं सदा सदा त्वंपदेनांगरूपो हि जीवः संसारलक्षणः १५ त्वमर्थोऽगरूपाय सोऽहंशब्दा
र्थ एव हि त्वमहंपदलक्ष्यार्थश्चिद्रूपः परमेश्वरः १६ त्वमहंपदलक्ष्यार्थः सैव देहादिलक्षणः ततश्शब्दार्थतास्यैव वि
शुद्धत्वात्तदैव हि १७ त्वमहंपदलक्ष्यार्थे जीवात्मा चांगरूपकः अशिवस्तत्सदानन्दस्ततो नैव शिवो भवेत् १८ जग
च्चराचरं चैव सत्यं पूर्णं चिदात्मकं शुद्धं वदंगरूपो हि तत्त्वमर्थो न संशयः १९ तत्त्वंपदार्थौ लिंगांगरूपावन्योन्यविरुद्धकौ ॥
उपाधिकृतया वाच्यमत्यन्तासच्चित्सुखात्मकं २० लक्ष्यार्थमविरुद्धं यत् शिवं नन्दति यामतिः सा सावंध इति शक्तो वेदवे
दांतवेदिभिः २१ लिंगरूपो महादेवः पूर्णश्चैतन्यलक्षणः सोंगरूपो हं जीवात्मा तस्मिन्नन्यापरं यत् २२ यो भाति चां
गरूपो हं जीवात्मा परमात्मनः सोयमात्मा महादेवो लिंगरूपो महेश्वरः २३ यो मायोपाधिको देवो लिंगरूपः सदाशिवः ॥ सो
विद्योपाधिको भूत्वा भवत्यंगस्वरूपवान् २४ लीनं गच्छति यस्मिन्सा माया द्वैधकारिणी तल्लिंगमिति सन्मात्ररूपत्वेन पर
मार्थिकैः २५ एतस्मात्कारणादेव लिंगरूपं तमर्थयन् लिंगांगमेकमित्याहुः परे लिंगविदुत्तमाः २६ गम्यते योगिभिर्धीतो
गम्यज्ञानार्थदर्शनात् तथा निरूपणे सन्धिः लिंगं चिन्मात्ररूपतः २७ एतस्मात्कारणाच्चापि प्रसिद्धं परमात्मनः लिंगरूपस्य मी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शंकर शस्यनीलकंठस्यभूलिनः २८ उक्तएवंप्रकारेणलिंगरूपीमहेश्वरः इतिवेदांततंत्रेषुगीयतेतत्ववित्तमैः २९ अग्निनित्वलस
न्मात्रंगच्छतीतिगमुच्यते रूपेतेगमतिप्राज्ञैरंगतत्वविचिंतकैः ३० तस्मादंगस्वरूपोसौजीवः संसारइतिभाक् संसारहंत्ति
राहितोलिंगरूपोविकारपतिः ३१ लिंगांगरूपयोर्योसौसंयोगः शिवजीवयोः एकंस्वरूपंसुदृढंसंबंधइतिसंस्मृतः ३२ वत्यदेनो
च्यतेलिंगंत्वंपदेनागमीरितं अनयोरैक्यभावोहिसंबंधोसियदेनच ३३ इतिवाक्यानुसंधानंभासतेयस्यसंततं गुरूपदे
शाल्लिंगांगसंबंधीतिसउच्यते ३४ एकलिंगांगसंबंधिभावनायस्यविद्यते सयोगीसचसर्वज्ञःसजीवन्मुक्तउक्तउच्यते
३५ लिंगांगपदवाच्यार्थहित्वासम्यग्धियापुनः लक्ष्यार्थलक्षयित्वार्थसोहमेवेतिचिंतयेत् ३६ लिंगांगपदसंभूतसम्यग्धी
जन्ममात्रतःअविद्यासहकार्येणनाभूदितिभविष्यति ३७ लिंगंभवोभवान्यंगमनयोःसंगतिःपरा अनंदरूपिणीयासोसंबंध
इतिकथ्यते ३८ अंगशक्तिःशिवोलिंगंतयाभक्त्यावगम्यते इतिविज्ञाननिष्पत्तियासासंबंधउच्यते ३९ अंगंशक्तिरितिप्रोक्तं
शक्तिवान्लिंगमुच्यते अनयोरैक्यविज्ञानंसंबंधइतिकथ्यते ४० लिंगंशिवनियुतांगंप्रपंचंससुरासुरं तस्मिंस्तस्यलय
स्थानंसंबंधइतिगीयते ४१ योवैलिंगांगसंबंधपदार्थोस्मिन्शिवात्मकः ॥ सच्चिदानंदसंपूर्णस्वरूपोहमितिस्मरेत ४२ ए

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वंलिंगांगसंबंधपदार्थमनमुत्तमं लब्ध्वागुरूपदेशाद्यः सोलिंगांगसंबंधवान् ४३ लिंगांगसंबंधपदार्थमेवंनिश्चित्यसत्सुखस्वरू
पंरूपं गुरूपदेशादर्पितकैविद्ययालिंगांगसंगंकुरुतेसयोगी ४४ मंगलात्मकशिवलिंगधारणंसंगवर्जिततनुंकुरुतेयः॥
अंगजोर्वदहनभवसिंधुसंगभंगतरलंप्रतेरतः ४५ प्राणरूपइतिजीवउच्यतेलिंगरूपइतिशंकरःस्मृतः यस्तयोरैक्यमितिवे
दितानयोःप्राणलिंगविदसौशिवयोगी ४६ गुरुस्समासरमात्मवेदनमिदंलिंगांगसंबंधिनः प्रत्यग्भातिपदत्रयार्थकलितं
शुद्धंसदानंदकं सभ्योकंठपदाब्जभक्तिभरितेस्वांतेपुमान्सर्वदासत्क्राकर्मकलापमम्नविषयैनैवंनिशिद्धंचरेत ४७ लिंगां
गमयमेवहंजगत्सर्वंचराचरं लिंगांगव्यतिरेकेननास्तिसर्वंत्रकिंचन ४८ इतिभावानुसंधानेयेतुलिंगार्चनेविदुः यतोन्यथा
र्चनंयत्नकुरुतेसपशुर्नरः ४९ लिंगंशिवंप्राणसमाख्यमंगतस्मिन्लयस्तस्यचोक्तःप्रयः स्वदेहिकेहृणशिवैक्यभा राम.
जानर्च्चयेल्लिंगमनन्यचेताः ५० तदेवहृत्सांबुजपीठमध्येनिधायलिंगंपरमात्मचिन्हं समर्चयेदेकधियोपचारैर्नरस्स
८ वासंतरभेदभिन्नैः ५१ धारयेत्समतांकंथांसमाख्यांस्मघुरिकां स्वांकमंडलुंवस्त्रज्ञानदंडंमनोहरं ५२ वैराग्यभोस्तापात्रे
चभक्तिभोस्वांचयाचयेत् लिंगांगसंगिनःशुद्धान्सदाचाराऩ्वितान्नरान् ५३ एवंविचरतस्तस्यभवंतितेपरिग्रहाः शिवा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भार्यापुत्रस्तोपस्समा हि परिचारिका ५४ माता भक्तिः पिता चारो सत्यनप्स मसरवा वैराग्यं सुहृदा चारो दमः भ्राता स्वसा मता
५५ दासीत्वहिंसा दासः स्याद्दमं स्नेहः प्रकीर्तितः मैत्र्याद्यास्तनयाः प्रोक्ता धर्मो सौख्याहं नमतं ५६ ज्ञानं देहस्तयास्येत्रं वि
चारः सर्वगोचरः देशो मोक्षः सुगम्यायं प्राणलिंगांगसंगिनां ५७ एतान्परिग्रहान्वत्सगृहित्वा शुद्धमानसः परिपूर्णोऽभि
दानंदश्चरेद्दुर्वीममानरः ५८ लोभो महाकंटकं इंद्रियाणि दृष्टास्तोमोह महापिशाचः क्रोधस्तरसर्भमन्ता हि कन्यामारः सु
चोरोमरअंधकारः ५९ तापत्रयमहागर्तो विषयाकंटकांकुराः आसत्याविषवल्ली स्यादहंकारो विषहृदः ६० एतान्नुपदृश्या
न्सर्वान्विचार्य स्वधिया नरः संसारकानने भक्तो विचरन्सुखमश्नुते ६१ पैनो शिवभक्त जो नर तेणे भुइक्रम्न अभ्यंतर समस्त
त्यजावे दुर्विकार सांगिजे तेते २ लिंगार्पिताभिद्रव्याणि भुंजीयाद्यदि मानवः अनर्पितानि द्रव्याणि वर्जयेद्भक्तिमान्नरः ६२
अनर्पितानि भुंजीयान्प्रमादाद्यदि मानवः कुर्यात्प्राणपरित्यागं प्रत्राही न विचारयेत् ६३ अप्याप दिहुरंना या मन्यदेवार्पितं सुधीः
न भुंजीयात्प्रमादेन भुंक्ते स पतितो भवेत् ६४ पात्रस्थं शिवभुक्तं यत् भुंजीयात्सदाद्वितः भांडस्थं न तु भुंजीयाद्यदि भुंक्ते स पापभुक् ६५
नद्देसेत्सर्वदा मर्त्यः शिवादन्यत्तु दैवतं नान्यदेवार्चनं मर्त्यो सदा शिव बहिष्कृता न ६६ लिंगांगसंगिनः भद्रान्सदा शिवपतिव्रता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शंकर

न पूजयेदादरेणैव श्रद्धाभक्तिसमन्वितः ६७ धारयेदवधानेनलिंगंसद्गुरुणार्पितं प्रमादात्पतितेनलिंगेप्राणानपिपरित्यजे
त् ६८ प्राणलिंगेगतेप्राणान्नत्यजेल्लनराधमः सचांडालइतिज्ञेयः शिवद्रोहीनतंस्पृशेत् ६९ नतस्यसूतकंवत्सप्राण
लिंगांगसंगिनः जननेपथ्यरतोर्थेचविद्यतेपरमार्थतः ७० कुलजात्यादयोभावाधर्मादेहस्यनात्मनः प्रत्यक्त्वात्स्वबोधरूप
त्वात्पूर्णत्वात्शिवरूपतः ७१ तथापिखलुआचारंलौकिकंवैदिकंतथा साधवनेनकुर्वीतशिवार्चनधियानरः ७२ यावत्स्या
न्नष्टकर्मोत्थःसंसारःप्रतिभासते तावत्कुर्वीतकर्माणिवेदतंत्रोदितानिच ७३ यथाहस्तफलंहस्ताद्धस्तेननतुभ्यतेस्वतः
तथासर्वाणिकर्माणिपतंतिशिवयोगिनः ७४ स्वप्नकालेकृतंपापंब्रह्महत्यादिकंचयत् यथावैबोधसमयेतन्मिथ्याभवेत
यथा ७५ तथाकृतंमहापापंलिंगधारणतःपुरा यद्यास्तितत्क्षयंयातिलिंगधारणतःपरं ७६ अनेनसदृशंधर्मंनपश्यामिष रम
डानन वेदतंत्रपुराणेषुसत्यंसत्यंमयोदितं ७७ कांक्षंतिसर्वेपितरःकुलेनोभवेयुःपुत्राःशिवभक्तियुक्ताः संतोभविष्यं
तिविशुद्धभावास्तेषामथैकोविभृयाच्चलिंगं ७८ तस्यप्रभावाद्वयमेवलोकंप्राप्यामहेतेनसुतत्त्वभाजः इत्थंस्वलोकेव
सतिगतास्तेकांक्षंतिनित्यंपितरःशिवैक्य ७९ लिंगांगसंगंकुर्वंतःस्पृष्ट्वाद्विजवरंरवेःस्थानात्चमंडलंभित्त्वासंत्रुज्यौछिवे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८० येषां संरक्षणं यस्तु कुरुते मनुजोत्तमः स धन्यः सत्कृतार्थश्च स शिवैक्यपदं व्रजेत् ८१ तस्मात्सर्वं परित्यज्य सर्वभावेन
सर्वदा पूजयेदादरेणैव लिंगांगसंगिनं द्विज ८२ यः पूजयति लिंगांगं ध्यानात्सत्कृधियं द्विज पुनर्भवो न तस्यास्ति सत्यं
सत्यं मयोदितं ८३ एतस्मात्परो धर्म इति मे मतिः तस्मात्सर्वप्रयत्नेन धर्ममाश्रय सर्वदाः ८४ इदमतिमहिमानादा
त्मबोधात्तु संगं परममतिरहस्यं वेदतंत्रप्रसिद्धं भुवनजनहितार्थं प्राणलिंगे धर्मं सकलसुजनसेव्यं भाषितं मुक्तिदं ते ८५
त्वमप्येवं महाभाग सर्वदोषविवर्जितं धर्मं कुरु यथाविप्राय प्राणलिंगांगसंगिने ८६ श्रुत्वा धर्ममिमं परात्परतरं संसार
संशोषणं लिंगांगोत्तमसंगमर्थं ललितं निर्वाणसौख्यप्रदं स्कंदो भक्तिसुधाभिलाषनिरतः शर्वं भवानीधवं प्रेलंह्याच्युत
पूजितांघ्रियुगलं नत्वा भवध्यानगात् ८७ भक्त्या परवशमभूत्तास्तं स्तुष्टाव शंकरं ॥ गंगाधरं विरूपाक्षं गिरींद्रतनुजाधवं
८८ नमः शिवाय सोमाय भक्तापहारिणे विद्यारूपाय रुद्राय नीलकंठाय शूलिने ८९ नित्यानंदं निराधारं निर्विकल्पं
निरंजनं निग्रहानुग्रहकारं जगतां नौमि शंकरं ९० सृष्टिस्थितिविनाशाय हेतुभूतमहेतुकं वंदे सच्चित्सुखात्मानं कला
निधिकलाधरं ९१ नागालंकृतसर्वांगं जटामुकुटमंडितं गिरिजारमणं वंदे गिरिसंगितवत्सलं ९२ दक्षाध्वरध्वंसकरं महा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शंकरः ताण्डवमंडितं तापत्रयादिविवर्जितं महामहेश्वरं वंदे ९३ विश्वेश्वरं विरूपाक्षं विश्वरूपधरं हरं भूतयोनिं महेशानं वंदे अंब
कमव्ययं ९४ कलातीतं कलाधारं कोटिसूर्यसमप्रभं कामावलेपविध्वंसं तं वंदे वासवार्चितं ९५ सर्वाधारं सदानंदं
सर्वज्ञं सर्वनायकं सर्वोपद्रवनिर्मुक्तं वंदे शंभुं जगत्पतिं ९६ सूत उवाच इति श्रुत्वा महादेवं भक्तिनम्रेण चेतसा स्कंदो
लिंगांगसंबंधापराभिज्ञो बभूव ह ९७ भवंतोपि महाप्राज्ञाः सदाशिवपतिव्रताः भवंतु प्राणलिंगांगसंबंधे जयवेदिनः
९८ यूयं श्रद्धान्विताः पूताः शिष्यैः परिवृता द्विजाः स्थापयध्वमिमं धर्मं मोक्षसोपानपद्धतिं ९९ स्थापितेस्मिन् महाध
र्मे शैवे व्यसंसारबंधके जगत्सर्वमिदं विप्राः स्थापितं भवति ध्रुवं १०० यः स्थापयितुमुद्युक्तः श्रद्धयैव समोपि सन् धर्मं
स्थापयति पूंसां यतमानः स हि द्विजाः १ रक्षणं कुरुते यस्तु सोपि स्वर्गपदं व्रजेत् भ्यः शांभवं महाधर्मस्थापनार्थं त्यजेद सु राम
न् स गणेशत्वमाप्नोति शंकरस्य प्रसादतः २ यदा यदा हि धर्मस्य हानिश्चैव संजायते तदा तदावतारोयं गणेशस्य
महीतले ३ यदा यदा शिवैक्या भाजां हानिर्भवेन्मुनि तत्रैव तीर्थे तदा तदा भूमितले गणेशाः शंभुर्विकुर्वंति हि धर्मसंस्था
४ धर्मग्लानिर्भूद्यदा शंभगवान् नानाकुलेषु स्थिता भूमौ शंकरनिंदका नघवनस्तद्धर्मविध्वंसकान् शिक्षांतः शिवधर्म

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऋषय उचुः सूतधर्मविदांश्रेष्ठ ज्ञातमस्माभिरुत्तमं वीरशैवाश्रितंधर्मरहस्यंत्वत्प्रसादतः १ ईदानींश्रोतुमिच्छामवीरमाहेश्वरस्यतु कृ
तदानफलंपूजाफलंवक्तुंत्वमर्हसि २ सूतउवाच वक्ष्येभाग्यवतांश्रेष्ठाः प्राणलिंगांगसंगिनः कृतदानफलंपूजाफलंमाहेश्वरस्य
तु ३ पुराकुमारःपप्रच्छशंकरंशशीभूषणं एतदर्थंमहाभागः प्रोवाचास्मैमहेश्वरः ४ तच्छृणुध्वंमुनिश्रेष्ठादानमानार्चनेफलं
वक्ष्यामिशिवभक्तस्यदानमानार्चनेफलं संसारपाशैर्बंधघ्नंसम्यक्ज्ञानप्रदंनृणां ५ योहस्तपीठेनिजलिंगमिष्टंविन्यस्यत
ल्लीनमनःप्रचारः बाह्यक्रियासंकुच्यनिस्पृहात्मासंपूजयत्यंगसवीरशैवः ६ दुर्लभास्त्रिषुलोकेषुप्राणलिंगांगसंगिनः पूर्व
जन्मकृतात्पुण्यात्केषांचित्सुलभोभवेत् ७ यैःपुराराधितःशंभुर्भक्तिप्रगुणमानसैः तैरेवलभ्यःपुण्यात्माशिवलिंगांगसंगभा
क् ८ सुगमप्रकारे १० नयासकत्वार्थीशिवयोगीहेप्राणलिंगांगसंगो तेनिश्चयेयावतीयेजगी पुण्यपुरुष १९ लिंगांगसं
गिनोयस्ययद्दृग्विषयत्वेनः तेसर्वेपापनिर्मुक्तायास्यंतिपरमांगतिं १० प्राणलिंगैकनिष्ठस्यअंगस्पृष्टासमीरणः यत्रगच्छ लिं
तितत्रस्थामर्त्यामुक्तानसंशयः ११ शिवलिंगांगसंबंधभाजांदर्शनमात्रतः मुक्तिंगच्छंतिमनुजाःपशुपक्षिमृगादयः १२ ग ग
संगिनंमर्त्यंलिंगध्यानपरायणं अनुव्रजतियोमर्त्यसोपिमुक्तिमवाप्नुयात् १३ यापूजाममभक्तस्यकृतायेनषडानना सामयैवकृता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूजातेननास्त्यत्रसंशयः १४ माहेश्वरस्यहृदयांबुजकर्णिकायांमध्येवसामिगिरिराजसुतासहायः तंपूजयेद्यइहमामनुजांर्चयेद्वैतस्मै
ददामिशिखिवाहनवांछितार्थान् १५ बहिस्थाःसर्वदासर्वेत्वंनंदिगणनायकः ममात्माप्राणलिंगैक्यंसएवाहंनसंशयः १६
वीरमाहेश्वरंमांचविभिन्नंप्रवदंतिये तेमूढाएवमनुजानात्रकार्याविचारणा १७ अतःसुखार्थ्यैशिवलिंगपूजकंसमर्चये
न्नित्यमतंद्रितःसुधीः समस्तसंसारनिवृत्तयेसदाजलान्नवस्त्राभरणांगणादिभिः १८ युगपच्छिवलिंगैक्यपादस्पृष्टरजां
सिचा पतंतीमस्तकेयस्यसमुक्तोनात्रसंशयः १९ पादप्रक्षालनंयस्तुकुरुतेशीतलोदकैः वीरमाहेश्वरस्यासौचतुरंबु
धिराड्भवेत् २० धृतलिंगस्यमर्त्यस्यपादप्रक्षालितंजलं पायभुक्त्यर्थमज्ञानांतत्तीर्थंशिखिवाहन २१ प्राणलिंगांगसंबं
धिपादप्रक्षालितंजलं लिंगांगसंगरहितंयपिबेत्तस्यपुण्यदं २२ दद्यान्मृद्वासनंयस्तुशिवभक्तस्यसादरं धृतलिं
गस्यचपुमान्सस्याद्द्वीपधिपोभवेत् २३ वस्त्रंशितापनोदार्थंयोदद्याच्छिवयोगिने ससर्वभोगसंयुक्तोलभतेब्रह्मणः
पदं २४ छत्रंचोपानहौयस्तुचामरंव्यजनानिवा दद्याल्लिंगार्चकायासौऐंद्रंपदमवाप्नुयात् २५ धनंदद्याद्यथाशक्तियःपुमा
न्शिवयोगिने सधनेशत्वमाप्नोतिसर्वभोगसमन्वितं २६ पूरयित्वागृहंसम्यक्सर्वोपकरणान्वितं लिंगांगसंगिनेदद्याद्यःसशै

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वंपरंस्त्यजेत् २७ दानानांचसमस्तानांचत्वार्येतानिभूतले श्रेष्ठानिकन्यागौर्भूमिर्विद्यादानानांसर्वदा २८ तस्मात्कन्याप्रदानेनसमं
दानंनविद्यते संततौसंततौतस्यांयान्त्यपत्यानिभूतले २९ भवंतितेषांरोमाणियावंत्येषुवसतिवै तावंतिवर्षाणिनरोविमानेस
र्वकामिकं ३० अत्रस्यसर्वलोकेषुभ्रमन्कन्याप्रदः सुखं सर्वभोगान्क्रमाद्भुक्त्वाततोगच्छतिचैकतां ३१ पयस्विनींस
वत्सांगांसर्वालंकारभूषितां योदद्याच्छिवभक्तायसगच्छेच्छिवसन्निधौ ३२ भक्तायभूमिसंभूतवीजसंख्यातवत्स
रान् भूमिदःशिवलोकेनसर्वान्कामानवाप्नुयात् ३३ योदद्याच्छिवभक्तायविद्याकोशंसपुस्तकं ससर्वकर्मनि
र्मुक्तोनपिबेज्जननीस्तनं ३४ ध्यानानामुत्तमंध्यानंशिवध्यानंप्रकीर्तितं दानानामुत्तमंदानंविद्यादानमुदीरितं ३५
विद्यादानसमंदानंनास्तिलोकेषुसर्वदा विद्ययाप्राणिनांमुक्तिस्तस्मात्तद्दानमुत्तमं ३६ विद्यादानंमहादेवभक्तायशि
वयोगिनेसर्वपापविनिर्मुक्तःशिवलोकेमहीयते ३७ यावंत्यन्नस्यसिक्थानिदत्तस्यशिवयोगिने तावंतिवर्षाणिनरोवसे
च्छिवपुरीसुखं ३८ अन्नंवाजलमात्रंवायोदद्याल्लिंगधारिणे तदन्नंमेरुसदृशंतज्जलंसागरोपमं ३९ यत्रमाहेश्वराः
कुर्युश्छिवलिंगार्चनंसकृत् वसंतितत्रतीर्थानिसर्वाणिसततंगुह ४० आत्मनोयदभीष्टंस्यात्तेनद्रव्येणपूजयेत् येनयेनप्रका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शां॰कार॰ रेणशिवभक्तस्यचेतसा ४१ यस्त्विमंकुरुतेमर्त्यःसवैशिवपुरंव्रजेत् संसारसागरेऽगाधेदुःखावर्तशताकुले मज्जतांमनुजानांवैपू अ॰ ५
जामाहेश्वरस्यनौः ४२ तस्मात्सर्वंपरित्यज्यवीरमाहेश्वरंजनः पूजयेदादराद्यस्तुससम्यग्ज्ञानवान्भवेत् ४३ नविरमाहेश्व
रसेवयाविनाशिवस्यभक्तिर्मनुजस्यविद्यते विनास्वभक्त्याशिववेदनंनहिप्राधान्यमेतच्छिवभक्तपूजनं ४४ श्रीशंकरउवा
च अतउक्तप्रकारेणशिवभक्तास्तपस्विनः पूजयानिशमव्यग्रोवत्सलिंगांगसंगिनः ४५ अस्मिन्नर्थेस्त्वसंख्येयेश्रुतयःस ३
कलागमाः ४६ पुराणानिसमस्तानिपर्यवस्यंतियुक्तयः ४६ सूतउवाच इत्युक्तःशंकरेणासौश्रीमान्वर्हिनवाहनः ननाम
गौरीशंभक्त्यासर्वज्ञंकरुणानिधिं ४७ यूयंश्रद्धान्विताविप्रादानमानार्चनादिभिः षट्स्थलज्ञानवंतंतंवीरमाहेश्वरंजनं ४८
पूजयध्वंमहाभागापूजासापुरुषार्थदा ४९ एषवःकथितोधर्मःसर्वधर्मोत्तमोमतः शिवप्रीतिकरोविप्राशिवभक्तार्चनोकि
तः ५० नातःपरतरोधर्मस्त्रिषुलोकेषुविद्यतेविद्यायांरमतेयस्मान्मायांत्रहेयांस्ववद्धहेतु अनेनैवनिरुक्तेनवीरमाहेश्वरःस्मृ एम॰
तः ५१ तस्मात्सर्वंपरित्यज्यवीरमाहेश्वरंजनं आराधयतविप्रेंद्रायूयंभक्तिपुरःसरं ५२ गृहेयस्येदमाख्यानंपुस्तकंतिष्ठतिध्रुवं त
स्यैश्वर्यसमृद्धिःस्यान्नाग्निचोरभयंभवेत् ५३ पठेद्वाश्रावयेद्यस्तुधर्माख्यानमिदंनरः सत्रिसप्तकुलोपेतःशिवलोकेमहीयते ५४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri